घयेऽभिघाते दाहे च वातपित्ते च तद्धितम् ॥”) रौप्यम् । हरितालम् । इति हेमचन्द्रः ॥ खलः । इति मेदिनी ॥

खर्ज्जूरः, पुं स्त्री, (खर्ज्ज मार्ज्जने + “खर्ज्जिपिञ्जादिभ्य ऊरोलचौ ।” उणां ४ । ९० । इति ऊरः ।) खर्ज्जूरीवृक्षः । खेजुर गाछ इति भाषा ॥ अस्य मस्तिष्कगुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । मूत्रातङ्करोगनाशित्वम् । बलप्राणशुक्रवृद्धिकारित्वञ्च । इति राजवल्लभः ॥

(“खर्ज्जूरस्य विषं हन्ति तदा वै नात्र संशयः ।” इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे ॥) वृश्चिकः । इति मेदिनी ॥

खर्ज्जूरिका, स्त्री, (खर्ज्जूर + स्त्रियां गौरादित्वात् ङीष् ततः संज्ञायां कन् टाप् च ततो ह्रस्वः ।) मिष्टान्नविशेषः । इति पाकराजेश्वरः । मिटा गजा इति भाषा ॥

खर्ज्जूरी, स्त्री, (खर्ज्जूर + गौरादित्वात् ङीष् ।) वनखर्ज्जूरः । इत्यमरः । २ । ४ । १७० ॥ खर्ज्जूरवृक्षः । खेजुरगाछ इति भाषा । तत्पर्य्यायः । खरस्कन्धा २ दुष्प्रधर्षा ३ दुरारुहा ४ निःश्रेणी ५ कषायी ६ यवनेष्टा ७ हरप्रिया ८ । अस्या गुणाः । कषायत्वम् । पक्वे गौल्यत्वम् । कषायिकत्वम् । पित्तक्रिमिनाशित्वम् । बृंहणत्वम् । कफशुक्रवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

“भूमिखर्ज्जूरिका स्वाद्वी दुरारोहा मृदुच्छदा ।
तथा स्कन्धफला काककर्कटी स्वादुमस्तका ॥ * ॥
पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा पराद्वीपादिहागता ॥
जायन्ते पश्चिमे देशे सा छोहारेति कीर्त्त्यते ।
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ॥
कोष्ठमारुतकृद्बल्यं वान्तवातकफापहम् ।
ज्वराभिघाततृट्कासश्वासनिवारकम् ॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ।
महतीभ्यो गुणैरल्पा स्वल्पा खर्ज्जूरिका स्मृता ॥ * ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥ * ॥
सुलेमानी तु मृदुला बलिहीनफला च सा ।
सुलेमानी श्रमभ्रान्तिदाहमूर्च्छास्रपित्तहृत् ॥”
इति भावप्रकाशः ॥

खर्द्द, दशने । इति कविकल्पद्रुमः । (भ्वां-परं-सकं-सेट् ।) दशनं दन्तकरणकक्रिया । खर्द्दति मत्कुणं लोकः । केचित्तु दन्दशूके इति पठित्वा दन्दशूकः दन्दशूककर्त्तृकक्रियेत्याहुः । इति दुर्गादासः ॥

खर्परः, पुं, (कर्परः । पृषोदरात् खत्वम् ।) तस्करः । धूर्त्तः । भिक्षापात्रम् । कपालम् । इति मेदिनी ॥ छत्त्रम् । इति त्रिकाण्डशेषः ॥

खर्परी, स्त्री स्त्री, (खर्परं उपधातुभेदकारकत्वेनास्त्यस्या इति अच् ततो गौरादित्वात् ङीष् ।) कर्परीतुत्थम् । इत्यमरटीका ॥

खर्परीतुत्थं, क्ली, (खर्पर्य्येव तुत्थं खर्परीरूपं तदाख्यं तुत्थं वा ।) तुत्थविशेषः । तत्पर्य्यायः । खर्परीरसकम् २ चक्षुष्यम् ३ अमृतोत्पन्नम् ४ तुत्थम् ५ खर्परिका ६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । चक्षुर्हितत्वम् । रसायनत्वम् । त्वग्दोषशमनत्वम् । दीप्तत्वम् । बलपुष्टिप्रदत्वञ्च । इति राजनिर्घण्टः ॥

खर्व्व, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) खर्व्वति । इति दुर्गादासः ॥

खर्व्वं, क्ली, (खर्व्व + अच् ।) संख्याविशेषः । इति मेदिनी ॥ तत्तु दशाब्जसंख्या । इति लीलावती ॥ दशवृन्दसंख्या । १०,०००,०००,००० । इति स्मृतिः ॥ (सहस्रमहापद्मसंख्या । इति गोः रामायणम् । यथा, तत्रैव । ६ । ४ । ५६-५८ ।

“शतं शतसहस्राणां कोटिमाहुर्मनीषिणः ।
शतं कोटिसहस्राणां शङ्ख इत्यभिधीयते ॥
शतं शङ्खसहस्राणां वृन्दमाहुर्मनीषिणः ।
शतं वृन्दसहस्राणां महावृन्दमिति स्मृतम् ॥
महावृन्दसहस्राणां शतं पद्मं परिश्रुतम् ।
शतं पद्मसहस्राणां महापद्मं विभाव्यते ॥
महापद्मसहस्राणां तथा खर्व्वमिहोच्यते ॥”)

खर्व्वः, पुं, (खर्व्व + अच् ।) कुबेरस्य निधिविशेषः । इति शब्दरत्नावली ॥ दशवृन्दसंख्या । इति स्मृतिः ॥ कुब्जकवृक्षः । इति राजनिर्घण्टः । (वामनः । इत्यमरः । २ । ६ । ४६ ॥ स्त्री । गायत्त्रीस्वरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ३८ ।

“खड्गखेटकरा खर्व्वा खेचरी खगवाहना ॥”)

ख(र्व्वे)र्व्वः, त्रि, (खर्व्व + अच् ।) क्षुद्रः । खाटो छोट इत्यादि भाषा । तत्पर्य्यायः । न्यङ् २ नीचः ३ वामनः ४ ह्रस्वः ५ । इत्यमरः । ३ । १ । ७० ॥ निखर्व्वः ६ खट्टनः ७ खर्व्वशाखः ८ । इति हेमचन्द्रः ॥ अनुच्चः ९ अनायतः १० । इति जटाधरः ॥

खर्व्वशाखः, त्रि, (खर्व्वा शाखा हस्तपदाद्यवयवाः यस्य ।) वामनः । खर्व्वः । इति हेमचन्द्रः ॥

खर्म्मः, पुं, (खुर + बाहुलकात् मक् पृषोदरात् उकारस्य लोपः ।) पौरुषम् । कौषनांशुकम् । पट्टवस्त्रम् । इति मेदिनी ॥

खर्व्व, गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) अन्तःस्थवकारान्तोऽयम् ॥ खर्व्वति । इति दुर्गादासः ॥

खर्व्वः, त्रि, (खर्व्व + अच् ।) ह्रस्वः । वर्गबकारान्तखर्व्वशब्दार्थोऽप्यत्र ॥

खर्व्वटः, पुं क्ली, (खर्व्व् + अटन्) चतुःशतग्राममध्यस्थलम् । इति भूरिप्रयोगः ॥ पर्व्वतप्रान्तग्रामः । इति श्रीभागवतटीकायां श्रीधरस्वामी ॥

खर्व्वुरा, स्त्री, (खर्व्व् + उरच् टाप् च ।) तरटीवृक्षः । इति राजनिर्घण्टः ॥

खर्व्वुजं, क्ली, (खर्व्वु + जन् + ड ।) महसुना । इति भावप्रकाशः ॥ खरबुजा इति भाषा ॥ (अस्य लक्षणं गुणाश्च यथा,—

“दशाङ्गुलन्तु खर्व्वुजं कथ्यते तद्गुणा अथ ।
खर्व्वुजं मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु ॥
स्निग्धं स्वादुतरं शीतं वृष्यम्पित्तानिलापहम् ।
तेषु यच्चाम्लमधुरं सक्षारञ्च रसाद्भवेत् ॥
रक्तपित्तकरन्तत्तु मूत्रकृच्छ्रकरम्परम् ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खल, चलनार्थे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) चलनार्थश्चालचयौ । चालश्चेह खलनम् । खलति खलो धर्म्मात् । इति दुर्गादासः ॥

खलं, क्ली, (खल् + अच् ।) भूः । स्थानम् । कल्कः । इति मेदिनी । खलाधानम् । इति हेमचन्द्रः ॥ धान्यमाड़िवार खामार इति भाषा ॥ (यथा, मनुः । ११ । १७ ।

“खलात् क्षेत्रादगाराद्वा यतो वाऽप्युपलभ्यते ॥”)

खलः, पुं, (खल् + अच्) सूर्य्यः । इति भूरिप्रयोगः ॥ तमालवृक्षः । इति शब्दचन्द्रिका ॥ धत्तूरवृक्षः । इति राजनिर्घण्टः ॥ (प्रवाहिकारोगे भेषजादिविहितपथ्यविशेषः । यथा, चिकित्सास्थाने नवमेऽध्याये वाभटेनोक्तम् ।

“कल्को विल्वशलाटूनां तिलकल्कश्च तत्समः ।
दध्नः सरोऽम्लः सस्नेहः खलो हन्ति प्रवाहिकाम् ॥”)

खलः, त्रि, नीचः । अधमः । इति मेदिनी ॥ क्रूरः । (यथा, मृच्छकटिकायां १ मे अङ्के ।

“खलस्वभावं भवितव्यतां तथा
चकार सर्व्वं किल शूद्रको नृपः ॥”)

तत्पर्य्यायः । दुर्ज्जनः २ पिशुनः ३ । इत्यमरः । ३ । १ । ४७ ॥ दुर्व्विधः ४ विश्वकद्रुः ५ नृशंसः ६ घातुकः ७ क्रूरः ८ पापः ९ । इति जटाधरः ॥

खलतिः, पुं, (खलन्ति केशा अस्मात् । खल सञ्चलने + “खलतिः ।” उणां ३ । ११२ । इति निपातनात् साधुः ।) इन्द्रलुप्तरोगयुक्तः । टाकपड़ा माथा इति भाषा । तत्पर्य्यायः । खल्वाटः २ ऐन्द्रलुप्तिकः ३ शिपिविष्टः ४ वभ्रुरः ५ । इति हेमचन्द्रः ॥ खल्लीटः ६ । इति त्रिकाण्डशेषः । खल्लिटः ७ । इति शब्दरत्नावली ॥ (“रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ॥
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ।
रोमकूपान् रुणद्ध्यस्य तेनान्येषामसम्भवः ॥
तदिन्द्रलुप्तं रूढ्याश्च प्राहुश्चाचेति चापरे ।
खलतेरपि जन्मैवं सदनं तत्र तु क्रमात् ॥”

इति वाभट्टे उत्तरस्थाने चयोविंशेऽध्याये ॥)

खलपूः, त्रि, (खलं भूमिं पुनाति परिष्कृतं करोतीति । खल + पू + क्विप् ।) मार्ज्जनकारी । झाड़ूकश फरास इत्यादि भाषा । तत्पर्य्यायः । बहुकरः २ । इत्यमरः । ३ । १ । १७ ॥

खलमूर्त्तिः, पुं, (खल इव अनिष्टकारकत्वात् उग्रा मूर्त्तिरस्य ।) पारदः । इति शब्दचन्द्रिका ॥ पारा इति भाषा ॥